
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल.क्र. M-2805 विषय स्तोत्र

नाव शप्तपती मंत्र

लेखक/लिपीकार

पृष्ठ 19 काळ – पुर्ण/ अपुर्ण

श्रीगणेशायनमः ॐअस्यश्रीअर्गलायाः
स्तोत्रस्यविष्णुरृषिः अनुष्टुपछंदः महा
लक्ष्मीर्देवतानवार्णोमंत्रशक्तिः मंत्रो
दितादेव्याबीजं सप्तशतीमंत्रस्तत्वं
अर्गलास्तोत्रजपेविनियोगः ॥ ऋषिरुवा
च याकापित्रिविधाव्याप्तासप्तधासैव
कीर्तिता तस्याभेदाह्यनंताश्चतन्मारा
त्म्यंशुभंवदे १ यादेवीस्तूयतेनित्यंवि

द्भवः सुरथोनामराजाभूत्समस्तेक्षिति
मंडले ४ तस्यपालयतः सम्यकप्रजाः
पुत्रानिवौरसान् वभूवुः शत्रवोभूपाः
कोलाविध्वंसिनस्तदा ५ तस्यतैरभवद्यु
द्धमतिप्रबलदंडिनः न्यूनैरपिसतैर्युद्धे
कोलाविध्वंसिभिर्जितः ६ ततः स्वपुरमा
यातोनिजदेशाधिपोभवत् आक्रांतः स
महाभागस्तैस्तदाप्रबलारिभिः ७ अमा

त्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः को
शो बलंचापहृतंतत्रापिस्वपुरेततः ततो
मृगयाव्याजेनहृतः स्वाम्यः सभूपतिः
एकाकीहयमारुह्यजगामगहनंवने ९
सतत्राश्रममद्राक्षीतद्द्विजवर्यस्यमेधसः
प्रशांतः श्वापदाकीर्णं मुनिशिष्योपशोभि
तं १० तस्थौकंचित्सकालंचमुनिनाते
नसत्कृतः इतश्चेतश्चविचरंस्तस्मिन्

मुनिवराश्रमे ११ सोचिंतयत्तदात्त्रम
मत्वाकृष्टमानसः मत्पूर्वैःपालितंपूर्वम
याहीनंपुरंहितत् १२ मद्भृत्यैस्तैरसद्
वृत्तैर्धर्मतःपाल्यतेनवा नजानेसप्रधानो
मेशूरहस्तीसदामदः १३ ममवैरिवशंयातः
कान्भोगानुपलप्स्यते येममानुगतानित्यं
प्रसादधनभोजनैः १४ अनुवृत्तिंध्रुवंते
द्यकुर्वंत्यन्यमहीभृतां असम्यग्व्यय

शीलैस्तैः कुर्वद्भिः सततंव्ययं १५ सचिं
तः सोतिदुःखेनक्षयंकोशोगमिष्यति ॥
एतच्चान्यच्चसततंचिंतयामासपार्थिवः
१६ तत्रविप्राश्रमाभ्यासे वैश्यमेकंददर्श
सः सपृष्टस्तेनकस्त्वंभो हेतुश्चागमनेत्र
कः १७ सशोकइवकस्मात्त्वंदुर्मनाइवल
क्ष्यसे इत्याकर्ण्यवचस्तस्यभूपतेः प्रणयो
दितं १८ प्रत्युवाचसतंवैश्यः प्रश्रयावन

तोनघ १९ वैश्यउवाच ॥२०॥ समाधि
र्नामवैश्योहमुत्पन्नोधनिनांकुले २१ पु
त्रदारैर्निरस्तश्चधनलोभादसाधुभिः वि
हीनश्चधनैर्दारैः पुत्रैरादायमेधनं २२
वनमभ्यागतोदुःखीनिरस्तश्चाप्तबंधुभिः
सोहंनवेद्मिपुत्राणांकुशलाकुशलात्मिकां
२३ प्रवृत्तिंस्वजनानांचदाराणांचात्रसंस्थि
तः किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं २४

कथंते किंनुसद्वृत्ताद्दुर्वृत्ताः किंनुमेसुताः
२५ राजोवाच २६ येर्निरस्तोभवान्लुब्धै
पुत्रदारादिभिर्धनैः २७ तेषुकिंभवतः स्नेह
मनुबध्नातिमानसं २८ वैश्यउवाच २९
एवमेतद्यथाप्राह भवानस्मद्गतंवचः ३०
किंकरोमि नबध्नातिममनिष्ठुरतांमनः
यैःसंत्यज्यपितृस्नेहंधनलुब्धैर्निराकृतः
३१ पतिःस्वजनहार्दंचहार्दितेष्वेवमेमनः

किमेतन्नाभिजानामिजानन्नपिमहामते ३२ यत्प्रेमप्रवणंचित्तंविगुणोष्वपिबंधुषु तेषांवृत्तेमेनिश्वासोद्दौर्मनस्यंचजायते ३३ करोमिकिंयन्नमनस्तेष्वप्रीतीषुनिष्ठुरं ३४ मार्कंडेयउवाच ३५ ततस्तौसहितौविप्रंतंमुनिंसमुपस्थितौ ३६ समाधिर्नामवैश्योसौसचपार्थिवसत्तमः कृत्वातुतौयथान्यायंयथार्हंतेनसंवि

ते ३७ उपविष्टौकथाः काश्चिच्चक्रतु
र्वैश्यपार्थिवौ ३८ राजोउवाच ३९
भगवंस्त्वामहंप्रष्टुमिच्छाम्येकं वदस्वतत्
४० दुःखायतन्मेमनसः स्वचित्तायत्ततां
विना ममत्वंगतराज्यस्यराज्यांगेष्वखि
लेष्वपि ४१ जानतोपियथाज्ञस्याकिमे
तन्मुनिसत्तम अयंचनिकृतः पुत्रैर्दारै
र्भृत्यैस्तथोज्झितः ४२ स्वजनेनचसंत्यक्त

स्तेषु हार्दीत्तथाप्यति एवमेषत्तथाहंच
द्वावप्यत्यंतदुःखितौ ४२ दृष्टदोषेपिवि
षयेममत्वाकृष्टमानसौ तत्केनैतन्महाभा
ग यन्मोहोज्ञानिनोरपि ४४ ममास्यचभव
त्येषाविवेकांधस्यमूढता ४५ ऋषिरुवा
च ४६ ज्ञानमस्तिसमस्तस्यजंतोर्विषय
गोचरे ४७ विषयश्चमहाभागयांतिचैवं
पृथक्पृथक दिवांधाः प्राणिनः केचिद्रा

त्रावंधास्तथापरे ७८ केचिद्दिवातथारा
त्रौप्राणिनस्तुल्यदृष्टयः ज्ञानिनोमनुजाः
सत्यंकिंनुतेनहिकेवलं ७९ यतोहिज्ञा
निनः सर्वेपशुपक्षिमृगादयः ज्ञानंचत
न्मनुष्याणांयत्तेषांमृगपक्षिणां ५० म
नुष्याणांचयत्तेषांतुल्यमन्यत्तथोभयोः
ज्ञानेपिसतिपश्यैतान्पतंगान्छाव
चंचुषु ५१ कणमोक्षादृतान्मोहात्

पीड्यमानानपिक्षुधा मानुषामनुजव्याघ्रसा
भिलाषाः सुतान्प्रति ५२ लोभात्प्रत्युपका
रायनन्वेतेकिंनपश्यसि तथापिममतावर्त्ते
मोहगर्तेनिपातिताः ५३ महामायाप्रभावेन
संसारस्थितिकारिणाः तन्नात्रविस्मयः का
र्योयोगनिद्रंजगत्पतेः ५४ महामायाहरेश्चै
तत्तयासंमोह्यतेजगत् ज्ञानिनामपिचे
तांसिदेवीभगवतीहिसा ५५ बलादाकृष्य

मोहायमहामायाप्रयछति तयाविस
र्ज्यतेविश्वंजगदेतच्चराचरं ५६ सैषाप्रस
न्नावरदानॄणांभवतिमुक्तये साविद्याप
रमामुक्तेर्हेतुभूतासनातनी ५७ संसार
बंधहेतुश्चसैवसर्वेश्वरेश्वरी ५८ राजो
उवाच ५९ भगवन्काहिसादेवीमहामा
येतियांभवान् ६० ब्रवीतिकथमुत्पन्ना
साकर्मास्याश्चकिंद्विज यत्प्रभावाचसा

देवीयत्स्वरूपायदुद्भवा ६१ तत्सर्वंश्रोतु
मिच्छामित्वत्तोब्रह्मविदांवरः ६२ ऋषिरुवा
च ६३ नित्यैवसाजगन्मूर्त्तिस्तयासर्वमि
दंततं ६४ तथापितत्समुत्पत्तिर्बहुधाश्रू
यतांमम देवानांकार्यसिद्ध्यर्थमाविर्भव
तिसायदा ६५ उत्पन्नेतितदालोकेसानि
त्याप्यभिधीयते योगनिद्रांयदाविष्णुर्जग
त्येकार्णवीकृते ६६ आस्तीर्यशेषमभज

त्कल्पांतेभगावानप्रभुः तदाद्वावसुरौघो
रौविख्यातौमधुकैटभौ ६७ विष्णुकर्ण
मलोद्भूतौहंतुंब्रह्माणमुद्यतौ सनाभि
कमलेविष्णोः स्थितोब्रह्माप्रजापतिः
६८ दृष्ट्वातावसुरौचोग्रौप्रसुप्तंचजनार्दनं
तुष्टावयोगनिद्रांतामेकाग्रहृदयस्थितः
६९ विबोधनार्थायहरेर्हरिनेत्रकृताल
यां विश्वेश्वरींजगद्धात्रींस्थितिसंहारका

रिंणी ७० निद्रांभगवंतीविष्णोरतुलांते
जसः प्रभुः ७१ ब्रह्मोउवाच ७२ त्वंस्वा
हात्वंस्वधात्वंहिवषटकारस्वरात्मिका
७३ सुधात्वमक्षरेनित्येत्रिधामात्रात्मिका
स्थिता अर्द्धमात्रास्थितानित्यायानुच्चार्या
विशेषतः ७४ त्वमेवसात्वंसावित्रीत्वं
देवीजननीपरा त्वयैतत्धार्यतेसर्वंत्व
येतत्सज्यतेजगत ७५ त्वयैतत्पाल्यते

देवित्वमत्स्यंतेत्वसर्वदा विसृष्टौसृष्टि
रूपात्वंस्थितिरूपाचपालने ७६ तथा
संहृतिरूपांतेजगत्तोस्यजगन्मये मह
विद्यामहामायामहामेधामहास्मृतिः ७७
महामोहांभगवतीमहादेवीमहासुरी
प्रकृतिस्त्वंहिसर्वस्यगुणत्रयविभाविनी
७८ कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारु
णा त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धिर्बोधल

क्षमा ७९ लज्जापुष्टिस्तथातुष्टिस्त्वंशां
तिःक्षांतिरेवच खड्गिनीशूलिनीघोरागदि
नीचक्रिणीतथा ८० शंखिनीचापिनी
बाणाभुशुंडीपरिघायुधा सौम्यासौम्य
तराशेषसौम्येभ्यस्त्वतिसुंदरी ८१ परा
पराणांपरमात्वमेवपरमेश्वरी यच्चकिं
चित्क्वचिद्वस्तुसदसद्वाखिलात्मिके ८२
तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसेत

रा ययात्वयाजगत्स्रष्टाजगत्पात्यत्ति
योजगत् ८३ सोपिनिद्रावशंनीतःकस्त्वां
स्तोतुमिहेश्वरः विष्णुःशरीरग्रहणमह
मीशानएवच ८४ कारितास्तेयतोतस्त्वां
कःस्तोतुंशक्तिमान्भवेत् सात्वमित्थं
प्रभावैःस्वैरुदारैर्देविसंस्तुता ८५ मोह
यैतौदुराधर्षावसुरौमधुकैटभौ प्रबोधं
चजगत्स्वामीनीयतामच्युतोलघु ८६

वोधश्च क्रियतामस्य हंतुमेतौ महासुरौ
८७ ऋषिरुवाच ८८ एवंस्तुता तदा दे
वी तामसी तत्र वेधसा ८९ विष्णोः प्रवो
धनार्थाय निहंतुं मधुकैटभौ नेत्रास्य ना
सिका बाहुहृदयेभ्यस्तथोरसः
९० निर्गम्य दर्शने तस्थौ ब्रह्मणो व्यक्त
जन्मनः उत्तस्थौ च जगन्नाथस्तया मुक्तो
जनार्दनः ९१ एकार्णवेहिशयनात्ततः स

ददृशेचतौ मधुकैटभौदुरात्मानावति
वीर्यपराक्रमौ ९२ क्रोधरक्तेक्षणावत्तुं
ब्रह्माणंजनितोद्यमौ समुत्थायततस्ता
भ्यांयुयुधेभगवान्हरिः ९३ पंचवर्षस
हस्राणिबाहुप्रहरणोविभुः तावप्यति
बलोन्मत्तौमहामायाविमोहितौ ९४
उक्तवंतौवरोस्मत्तोव्रीयतामितिकेशवं
९५ श्रीभगवानुवाच ९६ भवेतामद्यमे

तुष्टौममवध्यावुभावपि ९७ किमैन्ये
नवरेणात्राएतावद्धिवृतंमम ९८ ऋषिरु
वाच ९९ वंचिताभ्यामितितदासर्व
मापोमयंजगत् १०० विलोक्यताभ्यां
गदितोभगवान्कमलेक्षणः आवांजहि
नयत्रोर्वीसलिलेनपरिप्लुता १०१ ऋ
षिरुवाच १०२ तथेत्युक्त्वाभगवताशं
खचक्रगदाभृता कृत्वाचक्रेणवैछिन्ने

जघनेशिरसीतयो १०३ एवमेषासमुत्प
न्नाब्रह्मणासंस्तुताःस्वयंप्रभावमस्यादे
व्यास्तुभूयःशृणुवदामिते १०४ इति
मार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमा
हात्म्येमधुकैटभवधःप्रथमोध्यायः १
अथशत्रुसंहारणसर्वसौख्यप्राप्ति॥ ॐ ह्रां ह्रीं
ह्रुं ह्रौं ह्रुं श्रीः स्वाहा॥ जपसंख्या॥ १०८ नवा
क्षरमंत्रः॥ सर्वसौशत्रुनिर्मलभवेत॥

ॐ ह्रीं अस्य श्रीसप्तशतीमध्यमचरित्रस्य
विष्णुऋषिः उष्णिक् छंदः महालक्ष्मीदेवता
शाकंभरीशक्तिः दुर्गाबीजं वायुस्तत्वं यजु
र्वेदस्वरूपिणीमहालक्ष्मीप्रीत्यर्थं मध्यमच
रित्रजाप्ये विनियोगः ऋषिरुवाच १ देवासु
रमभूद्युद्धं पूर्णमब्दशतं पुरा महिषेसुराणा
मधिपे देवानां च पुरंदरे २ तत्रासुरैर्महावी
र्यैर्देवसैन्यं पराजितं जित्वा च सकलान्दे

वांनिंद्रोभून्महिषासुरः ३ ततः पराजि
तादेवाः पद्मयोनिंप्रजापतिं पुरस्कृत्य
गतास्तत्रयत्रेशगरुडध्वजौ ४ यथा
वृत्तंतयोस्तद्वन्महिषासुरचेष्टितं त्रिद
शाः कथयामासुर्देवाभिभवविस्तरं ५
सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच
अन्येषांचाधिकारान्सस्वयमेवाधिति
ष्ठति ६ स्वर्गान्निराकृताः सर्वेतेनदेवा

पाभुवि विचरंतियथामर्त्यामहिषेणदु
रात्मना ७ एतद्वः कथितंसर्वममरारिवि
चेष्टितं शरणंवः प्रपन्नास्मोवधस्तस्यवि
चिंत्यतां ८ इत्थंनिशम्यदेवानांवचां
सिमधुसूदनः चकारकोपंशंभुश्चभ्रुकु
टीकुटिलाननौ ९ ततोतिकोपपूर्णस्य
चक्रिणोवदनात्ततः निश्चक्राममहत्ते
जोब्रह्मणःशंकरस्यच १० अन्येषांचैव

देवानांशक्रादीनांशरीरतः निर्गतंसुमह
त्तेजस्तच्चैक्यंसमगच्छत ११ अतीवतेजसः
कूटंज्वलंतमिवपर्वतं ददृशुस्तेसुरास्त
त्रज्वालाव्याप्तदिगंतरं १२ अतुलंतत्रत
त्तेजः सर्वदेवशरीरजं एकस्थंतदभून्ना
रीव्याप्तलोकत्रयंत्विषा १३ यदभूच्छां
भवंतेजस्तेनाजायततन्मुखं याम्येन
चाभवन्केशाबाहवोविष्णुतेजसा १४

सौम्येनस्तनयोर्युग्मंमध्यंमैंद्रेणचाभवत्
वारुणेनचजंघोरूनितंबस्तेजसाभुवः १५
ब्रह्मणस्तेजसापादौतदंगुल्योर्कतेजसा
वसूनांचकरांगुल्यःकौबेरेणचनासिका
१६ तस्यास्तुदंताःसंभूताःप्राजापत्येन
तेजसा नयनत्रितयंजज्ञेतथापावकते
जसा १७ भ्रुवौचसंध्ययोस्तेजश्रवणौ
वनिलस्यच अन्येषांचैवदेवानांसंभव

स्तेजसांभवा १८ ततः समस्तदेवानांते
जोराशिसमुद्भवां तां विलोक्य मुदं प्रापु
रमरा महिषार्दिताः १९ शूलं शूला द्वि
निःकृष्य ददौ तस्मै पिनाकधृक् चक्रं च
दत्तवान् कृष्णः समुत्पाद्य स्वचक्र। २० तः
शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधीः
२१ वज्रमिंद्रः समुत्पाद्य कुलिशादमरा

।५०

धिपः ददौतस्यैसहस्राक्षोघंटामैरावता
त्तगजात् २२ कालदंडाद्यमोदंडंपाशंचां
बुपतिर्द्ददौ प्रजापतिश्चाक्षमालांददौब
ह्माकमंडलुं २३ समस्तरोमकूपेषुनिजर
श्मीन्दिवाकरः कालश्चदत्तवान्खड्गंत
स्याश्चर्मंचनिर्मलं २४ क्षीरोदश्चामलंहा
रमजरेचतथांबरे चूडामणिंतथादिव्यं
कुंडलेकटकानिच २५ अर्द्धचंद्रंतथाशु

भ्यं केयूराणि सर्वे बाहुषु नूपुरौ विमलौ त
द्वद् ग्रैवेयकमनुत्तमं २६ अंगुलीयकर
त्नानि समस्तास्वंगुलीषु च विश्वकर्मा ददौ
तस्यै परशुं चातिनिर्मलं २७ अस्त्राण्यने
करूपाणि तथाभेद्यं च दंशनं अम्लान
पंकजां मालां शिरस्युरसि चापरां २८ अद
दज्जलधिस्तस्यै पंकजं चातिशोभनं हिम
वान्वाहनं सिंहं रत्नानि विविधानि च २९

ददावशून्यंसुरयापानपात्रंधनाधिपः
शेषश्चसर्वनागेशोमहामणिविभूषितं ३०
नागहारंददौतस्यैधत्तेयःपृथिवीमिमां
अन्यैरपिसुरैर्देवीभूषणैरायुधैस्तथा
३१ संमानितानिनादोच्चैःसाट्टहासंमु
हुर्मुहुः तस्यानादेनघोरेणकृत्स्नमा
पूरितंनभः ३२ अमायतातिमहताप्र
तिशब्दोमहानभूत् चुक्षुभुःसकलालो

का: समुद्राश्चचकंपिरे ३३ चचालवसु
धाचेलु: सकलाश्चमहीधरा: जयेतिदेवा
श्चमुदातामुचु: सिंहवाहिनीं ३४ तुष्टुवु
र्मुनयश्चैनांभक्तिनम्रात्ममूर्त्तय: दृष्ट्वास
मस्तंसंक्षुब्धंत्रैलोक्यममरारय: ३५ सं
नद्धाखिलसैन्यास्तेसमुत्तस्थुरुदायुधा:
आ: किमेतदितिक्रोधादाभाष्यमहिषासु
र: ३६ अभ्यधावततंशब्दमशेषैरसुरैर्वृत:

सदर्श्तिततोदेवींव्याप्तलोकत्रयंत्विषा ३७
पादक्रांत्यानतभुवंकिरीटोल्लिखितांबरां
क्षोभिताशेषपातालांधनुर्ज्यानिः स्वनेनतां
३८ दिशोभुजसहस्त्रेणसमंताद्व्याप्यसंस्थि
तां ततः प्रववृतेयुद्धंतयादेव्यासुरद्विषां
३९ शस्त्रास्त्रैर्बहुधामुक्तैरादीपितदिगंत
रं महिषासुरसेनानीश्चिक्षुराख्योमहा
सुरः ४० युयुधेचामरश्चान्यैश्चतुरंगब

लान्वितः रथानामयुतैःषड्भिरुदग्राख्योमहा
सुरः ४१ अयुध्यतायुतानांचसहस्रेणमहाहनुः
पंचाशद्भिश्चनियुतैरसिलोमामहासुरः ४२
अयुतानांशतैःषड्भिर्बाष्कलोयुयुधेरणे ग
जवाजिसहस्रौघैरनेकैःपरिवारितः ४३ वृ
तोरथानांकोट्याचयुद्धेतस्मिन्नयुध्यत वि
डालाख्योयुतानांचपंचाशद्भिरथायुतैः ४४
युयुधुःसंयुगेतत्ररथानांपरिवारितः अ

न्येश्चतत्रायुतशोरथनागहयैर्वृत्ताः ४५
युयुधुः संयुगेदेव्यासहतत्रमहासुराः को
टिकोटिसहस्रैस्तुरथानांदंतिनांतथा
४६ हयानांचवृत्तोयुद्धेतत्राभून्महिषासुरः
तोमरैर्भिंडिपालैश्चशक्तिभिर्मुशलैस्तथा
४७ युयुधुःसंयुगेदेव्याःखड्गैःपरशुपट्टिशैः
केचिच्चचिक्षिपुःशक्तीःकेचित्पाशांस्तथा
परे ४८ देवीखड्गप्रहारैस्तुतेतांहंतुंप्रचक्रमुः

सापिदेवीततस्तानिशस्त्राण्यस्त्राणिचंडि
का ४९ लीलयैवप्रचिच्छेदनिजशस्त्रास्त्र
वर्षिणी अनायस्ताननादेवीस्तूयमाना
सुरर्षिभिः ५० मुमोचासुरदेहेषुशस्त्राण्य
स्त्राणिचेश्वरी सोपिक्रुद्धोधुतसटोदेव्या
वाहनकेसरी ५१ चचारासुरसैन्येषुवने
ष्विवहुताशनः निश्वासान्मुमुचेयांश्च
युध्यमानारणेंबिका ५२ तएवसद्यःसं

ह्नागणां शतसहस्रशः युयुधुस्तेपरश्व
भिर्भिंदिपालासिपट्टिशैः ५३ नाशयंत्तोसु
रगणान्देवीशक्त्युपबृंहिताः अवाद
यंत्त पटहान्गणाः शंखांस्तथापरे ५४
मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे
ततोदेवी त्रिशूलेन गदया शक्तिवृष्टिभिः
५५ खड्गादिभिश्च शतशो निजघान महा
सुरान् पातयामास चैवान्यान् घंटास्वनवि

मोहितान् ५६ असुरान्भुविपाशेनबध्वा
चान्यानकर्षयत् केचिद्द्विधाकृतास्तीक्ष्णैः
खड्गपातैस्तथापरे ५७ विपोथितानिपाते
नगदयाभुविशेरते वेमुश्चकेचिद्रुधिरं
मुशलेनभृशंहताः ५८ केचिन्निपाति
ताभूमौभिन्नाःशूलेनवक्षसि निरंत
राःशरौघेणकृताःकेचिद्रणाजिरे ५९
सेनानुकारिणःप्राणानमुमुचुस्त्रिदशार्द

नाः केषांचिद्बाहवः छिन्नाः छिन्नग्रीवा
स्तथापरे ६० शिरांसि पेतुरन्येषामन्येम
ध्ये विदारिताः विछिन्नजंघास्त्वपरे पेतु
रुर्व्यांमहासुराः ६१ एकबाहक्षिचरणाः
केचिद्देव्याद्विधाकृताः छिन्नेपि चान्ये
शिरसि पतितिताः पुनरुत्थिताः ६२ कबंधा
युयुधुर्देव्यागृहीतपरमायुधाः ननृतु
श्चापरेतत्रयुद्धेतूर्यलयाश्रिताः ६३

कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपा
णयः तिष्ठतिष्ठेतिभाषंतोदेवीमन्येम
हासुराः ६४ पातितैरथनागाश्वैरसुरैश्च
वसुंधरा अगम्यासाभवत्तत्रयत्राभूत्स
महारणः ६५ शोणितौघामहानद्यः स
द्यस्तत्रप्रसुस्रुवुः मध्येचासुरसैन्यस्यवा
रणासुरवाजिनां ६६ क्षणेनतन्महा
सैन्यमसुराणांतथांबिका निन्येक्षयंय

थावन्निःक्रान्तादात्महाञ्चयं ६७ सचसिं
होमहानादमुक्तजनधृतकेसरः शरीरेभ्यो
मरारीणामसूनिवविचिन्वति ६८ देव्या
गणैश्चतैस्तत्रकृतंयुद्धंतथासुरैः यथैषां
तुष्टुवुर्देवाः पुष्पवृष्टिमुचोदिवि ६९ इ
तिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी
माहात्म्येमहिषासुरसैन्यवधोनामद्वितीयो
ध्यायः २ गौडपाठेकवचमसमाप्तौशापश्र
प्रयोगाभावस्तिष्ठत्ति सर्वत्रापिगौडपाठे

अथस्तस्रिमंत्रः॥ ॐ ह्रीं क्लिं श्री चामुंडायैनमः॥८

ऋ चिरत्वाच्च १ निरुन्यमानेतत्सैन्यमव
लोक्यमहासुरः सेनानीश्चिक्षुरःकोपाद्ययौ
योद्धुमथांबिकां २ सदेवीशरवर्षेणववर्ष
समरेसुरः यथामेरुगिरेःश्रृंगंतोयवर्षेण
तोयदः ३ तस्यछित्वाततोदेवीलीलयैवश

१८ स०

सोऽकरान् जघानऽतुरगान् बाणेर्यंतारं चैव
वाजिनां ४ विछेदऽच्चधनुःसद्योध्वजं चातिस
मुच्छ्रितं विव्याधचैवगात्रेषुछिन्नधन्वान
माप्नुगेः ५ सछिन्नधन्वाविरथोहताश्वोहत
सारथिः अभ्यधावत्ततोदेवीखड्गचर्मधरोऽसुरः
६ सिंहमाहत्यखड्गेनतीक्ष्णधारेणमूर्द्ध्नि
आजघानभुजेसव्येदेवीमप्यतिवेगवान् ७
तस्याःखड्गोभुजंप्राप्यपफालनृपनंदन त

३८

ततोजग्राहशूलंसकोपादारुणलोचनः ८
चिक्षेपचततस्तत्तुभद्रकाल्यांमहासुरः जा
ज्वल्यमानंतेजोभीरविबिंबमिवांबरात् ९
दृष्ट्वातदापतच्छूलंदेवीशूलममुंचत तच्छू
लंशतधातेननीतंसचमहासुरः १० हतेत
स्मिन्महावीर्येमहिषस्यचमूपतौ आजगाम
गजारूढश्चामरस्त्रिदशार्दनः ११ सोपिश
क्तिंमुमोचाथदेव्यास्तामंबिकाद्रुतं हुंका

वाभिहत्तांभ्रमौपातयामासनिःप्रभां १२ म
ग्रांबुद्धाकिंनिपतितांदृष्ट्वाक्रोधसमन्वितः चिसे
पचामरः श्रूलंबाणोस्तदपिसाछिन्नत १३
ततः सिंहः समुत्पत्यगजकुंभांतरोस्थितः बा
हुयुद्धेनयुयुधेतेनोच्चैस्त्रिदशारिणा १४
युध्यमानौततस्तौतुतस्मान्नागान्महीगतौ
युयुधातेतिसंरब्धौप्रहारैरतिदारुणैः १५
ततोवेगात्खमुत्पत्यनिपत्यचमृगारिणा

करप्रहारेणशिरश्चामरस्यपृथक्कृतं १६
उदग्रश्चरणेदेव्याः शिलावृक्षादिभिर्हतः
दंतमुष्टितलैश्चैवकरालश्चनिपातितः १७
देवीक्रुद्धागदापातैश्चूर्णयामासचोद्धतं
बाष्कलंभिंदिपालेनबाणैस्ताम्रंतथांधकं १८
उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुं त्रिने
त्राचत्रिशूलेनजघानपरमेश्वरी १९ विडा
लस्यासिनाकायात्पातयामासवैशिरः दुर्ध

रेंदुर्मृदंगांश्चोभौग्नौरैर्निन्ये यमक्षयं २० एवं संक्षी
यमाणेतु स्वसैन्ये महिषासुरः माहिषेणस्वरूपे
णत्रासयामासतान्गणान् २१ कांश्चित्तुंडप्र
हारेणखुरक्षेपैस्तथापरान् लांगूलताडितां
श्चान्यान्शृंगाभ्यांचविदारितान् २२ वेगेन
कांश्चिदपरान्नादेनभ्रमणेनच निश्वासप
वनेनान्यान्पातयामासभूतले २३ निपात्य
प्रमथानीकमभ्यधावतसोसुरः सिंहंहंतुं

महादेव्याः कोपंचक्रेततोंबिका २४ सोपि
कोपान्महावीर्यः खुरक्षुण्णमहीतलः शृंगा
भ्यांपर्वतानुच्चांश्चिक्षेपचननादच २५ वे
गभ्रमणविक्षुण्णामहीतस्यव्यशीर्यत लां
गूलेनाहतश्चाब्धिः प्लावयामाससर्वतः
२६ धूतशृंगविभिन्नाश्चखंडंखंडंययुर्घ
नाः श्वासानिलास्ताः शतशोनिपेतुर्नभ
सोचलाः २७ इतिक्रोधसमाध्मातमापतं

श्री स०

२१

तंमहासुरं दृष्ट्वासाचंडिकाकोपंतदधायत
दाकरोत २८ साक्षिप्तातस्यवैपाशंतंबवं
धमहासुरं तत्याजमाहिषंरूपंसोपिबद्धोम
हामृधे २९ ततःसिंहोभवत्सद्योयावत्तस्यां
बिकाशिरः छिनत्तितावत्पुरुषःखड्गपाणि
रदृश्यत ३० ततएवाशुपुरुषंदेवीचिच्छे
दसायकैः तंखड्गचर्मणासार्धंततःसोभू
न्महागजः ३१ करेणचमहासिंहंतंचकर्ष

२१

जगर्जच कर्षतस्तुकरंदेवीखड्गेननिरकृंत
त ३२ ततोमहासुरोभूयोमाहिषंवपुरास्थि
तः तथैवक्षोभ१यामासत्रैलोक्यंसचरा
चरं ३३ ततः क्रुद्धाजगन्माताचंडिकापान
मुत्तमं पपौपुनः पुनश्चैवजहासारुणलोच
ना ३४ ननर्दचासुरः सोपिबलवीर्यमदोद्ध
तः विषाणाभ्यांचचिक्षेपचंडिकांप्रतिभू
धरान् ३५ साचतान्प्रहितांस्तेनचूर्णयंती

क्षोत्करैः उवाचतंमदोद्धूतमुखरागाकुलाक्ष
रं ३६ देव्युवाच ३७ गर्जगर्जक्षणंमूढम
धुयावत्पिबाम्यहं मयात्वयिहतेत्रैवगर्जि
ष्यंत्याशुदेवताः ३८ ऋषिरुवाच ३९
एवमुक्त्वासमुत्पत्यसारूढातंमहासुरं पा
देनाक्रम्यकंठेचशूलेनैनमताडयत् ४०
ततःसोपिपदाक्रांतस्तयानिजमुखात्ततः
अर्द्धनिःक्रांतएवातिदेव्यावीर्येणसंवृतः ४१

अर्द्धनिःक्रांतएवासौयुद्धमानोमहासुरः
तयामहासिनादेव्याशिरःछित्वानिपाति
तः ४२ ततोहाहाकृतंसर्वंदैत्यसैन्यंनना
शयत प्रहर्षंचपरंजग्मुःसकलादेवता
गणाः ४३ तुष्टुवुःस्तांसुरादेवींसहदिव्यै
र्महर्षिभिः जगुर्गंधर्वपतयोननृतुश्चा
प्सरोगणाः ४४ इतिमार्कंडेयपुराणेसाव
र्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरवधो

१ स०

नामतृतीयोध्यायः ३ [redacted] अथजाज्व
ल्यमंत्रशत्रुसंहारणंस्तंभनं ॥ ॐ ज्रां ज्रुं ज्रैं
ज्रौं ज्रौं ज्रः स्वाहा ॥

ऋषिरुवाच १ शक्रादयःसुरगणानिह
तेतिवीर्येतस्मिन्दुरात्मनिसुरारिबलेच

देव्या तां तु तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः २
देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ता
मंबिकामखिलदेवमहर्षिपूज्यां भक्त्या
नताः स्म विदधातु शुभानि सा नः ३ य
स्याः प्रभावमतुलं भगवाननंतो ब्रह्मा ह
रश्च न हि वक्तुमलं बलं च सा चंडिका

६० स०

हिविनजगत्पपरिपालननायनाशायचाप्तु
भभयस्यमन्तिंकरोतु ४ याश्रीःस्वयं
सुकृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृ
तधियांहृदयेषुबुद्धिः श्रद्धासतांकुल
जेनप्रभवस्यलज्जातांत्वांनताःस्मपरिपा
लयदेविविश्वं ५ किंवर्णयामतवरूप
मचिंत्यमेतत्किंचातिवीर्यमसुरक्षयका
रिभूरि किंचाहवेषुचरितानितवाद्भु ४४

तानिसर्वेषुदेव्यसुरदेवगणादिकेषु ६
हेतुः समस्तजगतांत्रिगुणापिदोषैर्नज्ञा
यसेहरिहरादिभिरप्यपारा सर्वाश्रया
खिलमिदंजगदंशभूतमव्याकृताहिपर
माप्रकृतिस्त्वमाद्या ७ यस्याः समस्तसु
रतासमुदीरणेनतृप्तिंप्रयातिसकलेषुम
खेषुदेवि स्वाहासिवैपितृगणस्यचतृप्ति
हेतुरुच्चार्यसेत्वमतएवजनैः स्वधाच ८

याम्मुक्तिहेतुरविचिंत्यमहाव्रतात्वमभ्यस्यसे
सुनियतेंद्रियतत्त्वसारैः मोक्षार्थिभिर्मु
निभिरस्तसमस्तदोषैर्विद्यासिसाभगवती
परमाहिदेवी ९ शब्दात्मिकासुविमल
र्ग्यजुषांनिधानमुद्गीथरम्यपदपाठवतां
चसाम्नां देवित्रयीभगवतीभवभाव
नायवार्त्ताचसर्वजगतांपरमार्त्तिहंत्री
१० मेधासिदेविविदिताखिलशास्त्रसा

राडुगासिंदुर्गभवसागरनौरसंगा श्रीः
कैटभारिहृदयैककृताधिवासा गौरीव
मेवशशिमौलिकृतप्रतिष्ठा ११ ईषस्स
हासममलंपरिपूर्णचंद्रबिंबानुकारिकन
कोत्तमकांतिकांतं अत्यद्भुतंप्रहृत्तमा
त्तरुषातथापिवक्त्रंविलोक्यसहसामहिषा
सुरेण १२ दृष्ट्वातुदेविकुपितंभ्रुकुटीक
रालमुद्यच्छशांकसदृशच्छवियन्नसद्यः

प्राणान्मुमोचमहिषस्त्तदत्तीवचित्रंकैर्जी
व्यत्तेहिकुपितांत्तकदर्शनेन १३ देविप्र
सीदपरमाभवत्तीभवायसद्योविनाशय
सिकोपवत्तीकुलानि विज्ञात्तमेतदधुने
वयदस्तमेतन्नीतंबलंसुविपुलंमहिषा
सुरस्य १४ तेसंमत्ताजनपदेषुधना
नितेषांतेषांयशांसिनचसीदत्तिधर्म्म
वर्गः धन्यास्तएवनिभृतात्मजभृत्य

द्वारा येषां सदाभ्युदयदा भवती प्रसन्ना
१५ धर्म्याणि देवि सकलानि सदैव कर्मा
ण्यत्यादृतः प्रतिदिनं सुकृती करोति
स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लो
कत्रयेपि फलदा ननु देवि तेन १६ दुर्गे
स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृ
ता मतिमतीव शुभां ददासि दारिद्र्य
दुःखभयहारिणि का त्वदन्या सर्वोपका

श्री स०

रकरणाय सदाईद्विचिन्ना १७ एभिर्हिते
जीगाङ्कुपे त्तिसुवंत्त थैतेकुर्वन्तु नाममनरका
यचिरायपायं संग्राममत्युमधिगम्यदिवं
प्रयांतु मत्वेत्तिनूनमहित्तान्विनिहं सिंदे
वि १८ द्वेवकिंनभवती प्रकरोत्तिभस्म
सर्वासुतानरिपुयत्प्रहिणोबिशस्त्रं
लोकान्प्रयांतुरिपवोपिहिशस्त्रपूताद्
त्वंमतिर्भवत्तितेष्वपिनेतिसाध्वी १९

६१

त्वद्रूपभानिकरविस्फुरणैस्तथोच्चैः शृ
लाग्रकांतितिनिवहेनदृशोसुराणां यन्ना
गताविलयमंम्युमदिंदुवंद्रयोग्यानन्नं
तवविलोकयनांतदेतत् २० दुर्वत्त
वृत्तग्रामनंतवदेकिशीलंतस्पेनथेतदवि
चिंत्यमतुल्यमन्यैः वीर्यचिंतत्तत्तद
वपराक्रमाणांवैरिघ्नापिप्रकटितैवदस्या
त्वयेतद्धं २१ केनोपमाभवतुतेसपरा

५ स०

क्रमस्यतूपंचशत्रुभयकार्यत्तिहारिकु
त्रे चित्तेच्छ्पापसमरानिष्टुरताश्चदृष्ट्वात्व
य्येवदेविवरदेभुवनत्रयेपि २२ त्रैलो
क्यमेनदविलंरिपुनाशनेनत्रातंत्वयास
मरमूप्पयात्तमस्माकमुन्मदसुरारिभवन्न
मस्ते २३ शूलेनपाहिनोदेविपाहिखड्गेनचांबि
के घंटास्वनेननःपाहिचापज्यानिःस्व

वं शिउगणाभय

५६

नेनच २४ प्राच्यांरक्षप्रतीच्यांचचं
डिकेरक्षदक्षिणे भ्रामणेनात्मशूलस्य
उत्तरस्यांतथेश्वरि २५ सौम्यानिया
निरूपाणित्रैलोक्येविचरंतिते यानि
चात्यर्थघोराणितैरक्षास्मांस्तथाभु
वं २६ खड्गशूलगदादीनियानिचास्त्रा
णितेंबिके करपल्लवसंगीनितैरस्मान्
रक्षसर्वतः २७ ॠषिरुवाच २८ एवं

९० (?)

स्तुतासुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः अ
र्चितं जगतां धात्री तथा गंधानुलेपनैः २९
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपि
ता प्राह प्रसादसुमुखी समस्तान्प्रणता
न्सुरान् ३० देव्युवाच ३१ व्रियतां त्रि
दशाः सर्वं यदस्मत्तोभिवांछितं ३२ देवा
ऊचुः ३३ भगवत्या कृतं सर्वं न किंचिद
वशिष्यते ३४ यदयं निहतः शत्रुरस्मा

४९

कंमहिषासुरः यदिवापिवरोदेयस्त्वया
स्माकंमहेश्वरी ३५ संस्मृतासंस्मृता
त्वंनोहिंसेथाः परमापदः यश्चमर्त्य
स्तवैरेभिस्त्वांस्तोष्यत्यमलानने ३६
तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदा
वृद्धयेस्मत्प्रसन्नात्वंभवेथाः सर्वदांबिके
३७ ऋषिरुवाच ३८ इतिप्रसादितादे
वैर्जगतोर्थेतथात्मनः तथेत्युक्त्वाभ

५०

द्रकालेव भूत्वांतर्हितानृप ३९ इत्येतत्क
थितं भूप संभूता सा यथा पुरा देवी देवश
रीरेभ्यो जगत्त्रयहितैषिणी ४० पुनश्च गौ
रीदेहात्सा समुद्भूता यथाभवत् वधाय दु
ष्टदैत्यानां तथा शुंभनिशुंभयोः ४१ रक्ष
णाय च लोकानां देवानामुपकारिणी त
गु च्छृणुष्व मयाख्यातं यथावत्कथयामि ते ४२
इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे ५०

देवीमाहात्म्ये शक्रादिभिः स्तुता देव्याः
स्तुतिः महिषासुरवधः समाप्तः चतुर्थोध्या
यः ४ देवानां वरदानं नाम चतुर्थक
वचं॥ अथ प्रयोग शुभ योगः॥ त्रयोदशा अक्षरी॥
ॐ श्रां श्रीं श्रुं श्रैं श्रौं श्रं भैरवी येन मः॥

स०

५१

ॐक्लींअस्यश्रीउत्तरचरित्तस्यरुद्रऋषिः
अनुष्टुप्छंदः महासरस्वतीदेवता भीमा
शक्तिः भ्रामरीबीजं सूर्यस्तत्वं सामवेद
स्वरूपिणिमहासरस्वतीप्रीत्यर्थंउत्तरचरि
तस्यजाप्येविनियोगः ॥ ऋषिरुवाच १
पुराशुंभनिशुंभाभ्यामसुराभ्यांशचीपते
त्रैलोक्यंयज्ञभागाश्चहृतामदबलाश्र
यात् २ तावेवसूर्यतांतद्वदधिकारंत

ऐंद्रं कौबेरमथयाम्यंच चक्राते वरु-
णस्यच ३ तावेवपवनर्द्धिंचचक्रतुर्वह्नि-
कर्मच ततोदेवाविनिर्द्धूताभ्रष्टराज्याः
पराजिताः ४ हृताधिकारास्त्रिदशास्ता
भ्यांसर्वेनिराकृताः महासुराभ्यांतांदेवी
संस्मरत्यपराजितां ५ तयास्माकंवरो
दत्तोयथापत्सुस्मृताखिलाः भवतांना
शयिष्यामितत्क्षणात्परमापदः ६

इतिकृत्वामतिंदेवाहिमवंतंनगेश्वरं
जग्मुस्तत्रततोदेवीविष्णुमायांप्रतुष्टुवुः ७
देवाऊचुः ८ नमोदेव्यैमहादेव्यैशिवा
यैसततंनमः नमःप्रकृत्यैभद्रायैनियताः
प्रणताःस्मतां ९ रौद्रायैनमोनित्यायैगौ
र्यैधात्र्यैनमोनमः ज्योत्स्नायैचेंदुरूपिण्यै
सुखायैसततंनमः १० कल्याण्यैप्रणतां
वृद्ध्यैसिद्ध्यैकूर्म्यैनमोनमः नैरृत्यैभू

भृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः ११ दु
र्गायैदुर्गपारायैसारायैसर्वकारिण्यै ख्या
त्यैतथैवकृष्णायैधूम्रायैसततंनमः १२
अतिसौम्यातिरौद्रायैनतास्तस्यैनमोन
मः नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमो
नमः १३ यादेवीसर्वभूतेषुविष्णुमाये
तिशब्दिता नमस्तस्यै १४ नमस्तस्यै १५
नमस्तस्यैनमोनमः १६ यादेवीसर्वभूतेषु

चेतनेत्यभिधीयते नमस्तस्यै १७ नमस्त
स्यै १८ नमस्तस्यैनमोनमः १९ यादेवीस
र्वभूतेषुबुद्धिरूपेणासंस्थिता नमस्तस्यै २०
नमस्तस्यै २१ नमस्तस्यैनमोनमः २२
यादेवीसर्वभूतेषुनिद्रारूपेणासंस्थिता
नमस्तस्यै २३ नमस्तस्यै २४ नमस्तस्यै
नमोनमः २५ यादेवीसर्वभूतेषुक्षुधा
रूपेणासंस्थिता नमस्तस्यै २६ नमस्त

स्यै २७ नमस्तस्यैनमोनमः २८ यादे
वीसर्वभूतेषुछायारूपेणसंस्थिता
नमस्तस्यै २९ नमस्तस्यै ३० नमस्तस्यै
नमोनमः ३१ यादेवीसर्वभूतेषुशक्ति
रूपेणसंस्थिता नमस्तस्यै ३२ नमस्त
स्यै ३३ नमस्तस्यैनमोनमः ३४ यादेवी
सर्वभूतेषुतृष्णारूपेणसंस्थिता नम
स्तस्यै ३५ नमस्तस्यै ३६ नमस्तस्यैनमो
नमः ३७

यादेवीसर्वभूतेषुक्षांतिरूपेणासंस्थिता
नमस्तस्यै ३८ नमस्तस्यै ३९ नमस्तस्यैन
मोनमः ४० यादेवीसर्वभूतेषुजातिरूपे
णासंस्थिता नमस्तस्यै ४१ नमस्तस्यै ४२
नमस्तस्यैनमोनमः ४३ यादेवीसर्वभू
तेषुलज्जारूपेणासंस्थिता नमस्तस्यै ४४
नमस्तस्यै ४५ नमस्तस्यैनमोनमः ४६
यादेवीसर्वभूतेषुशांतिरूपेणासंस्थिता

नमस्तस्यै ४७ नमस्तस्यै ४८ नमस्त
स्यै नमोनमः ४९ यादेवीसर्वभूतेषु
श्रद्धारूपेणसंस्थिता नमस्तस्यै ५० न
मस्तस्यै ५१ नमस्तस्यैनमोनमः ५२
यादेवीसर्वभूतेषु कांतिरूपेणसंस्थि
ता नमस्तस्यै ५३ नमस्तस्यै ५४ न
मस्तस्यैनमोनमः ५५ यादेवीसर्वभू
तेषु लक्ष्मीरूपेणसंस्थिता नमस्तस्यै ५६

श्री०

नमस्तस्यै ५७ नमस्तस्यैनमोनमः ५८
यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थि
ता नमस्तस्यै ५९ नमस्तस्यै ६० नम
स्तस्यैनमोनमः ६१ यादेवीसर्वभूतेषु
स्मृतिरूपेणसंस्थिता नमस्तस्यै ६२
नमस्तस्यै ६३ नमस्तस्यैनमोनमः ६४
यादेवीसर्वभूतेषुदयारूपेणसंस्थिता
नमस्तस्यै ६५ नमस्तस्यै ६६ नमस्त

स्यैनमोनमः ६० यादेवीसर्वभूते
षुतुष्टिरूपेणासंस्थिता नमस्तस्यै ६८
नमस्तस्यै ६९ नमस्तस्यैनमोनमः
७० यादेवीसर्वभूतेषु मत्त रूपेणासंस्थि
ता नमस्तस्यै ७१ नमस्तस्यै ७२ नम
स्तस्यैनमोनमः ७३ यादेवीसर्वभूते
षुभ्रांतिरूपेणासंस्थिता नमस्तस्यै ७४
नमस्तस्यै ७५ नमस्तस्यैनमोनमः ७६

स०

इंद्रियाणामधिःष्ठात्री भूतानामखिलेषुया
भूतेषुसततंतस्यैव्याप्यैदेव्यैनमोनमः ७७
चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताजग
त् नमस्तस्यै ७८ नमस्तस्यै ७९ नमस्तस्यै
नमोनमः ८० स्तुतासुरैः पूर्वमभीष्टसंश्र
यात्तथासुरेंद्रेणदिनेषुसेविता करोतुसा
नः शुभहेतुरीश्वरीशुभानिभद्राण्यभिहं
तुचापदः ८१ यासांप्रतंचोद्धतदैत्यता

पित्तैरस्माभिरीशाच्चसुरैर्नमस्यते याचस्म
तातत्क्षणामेवहंतिनः सर्वापदोभक्तिवि
नम्रमूर्तिभिः ८२ ऋषिरुवाच ८३ एवं
स्तवादियुक्तानांदेवानांतत्रपार्वती
स्नातुमभ्याययौतोयेजाह्नव्यानृपनं
दनः ८४ साब्रवीत्तान्सुरान्सुभ्रुर्भ
वद्भिस्तूयतेत्रका शरीरकोशतश्चास्याः
समुद्भूताब्रवीच्छिवा ८५ स्तोत्रंममैत

त्क्रियत्ते शुंभदैत्यनिराकृत्तैः देवैःसमे
त्तैःसमरेनिशुंभेनपराजित्तैः ८६ शरीर
कोशाद्यत्तस्यापार्वत्यानिस्सृत्तांबिकाको
शकीत्तिसमस्तेषुत्ततोलोकेषुगीयते ८७
त्तस्यांविनिर्गत्तायांतुकृष्णाभूत्सापिपा
र्वत्ती कालिकेत्तिसमाख्यात्ताहिमाच
लकृत्ताश्रया ८८ त्ततोंबिकांपरंरूपं
बिभ्राणांसुमनोहरं ददर्शचंडोमुंडश्च

भृत्यौशुंभनिशुंभयोः ८९ ताभ्यांशुं
भायचाख्यातातीवसुमनोहरा का
प्यास्तेस्त्रीमहाराजभासयंतीहिमाचलं
९० नैवताद्दक्क्वचिद्रूपंदृष्टंकेनचिदुत्त
मं ज्ञायतांकाप्यसौदेवींगृह्यतांचासुरेश्व
री ९१ स्त्रीरत्नमतिचार्वंगीद्योतयंती
दिशास्त्विषा सातुतिष्ठतिदैत्येंद्रतांभ
वान्द्रष्टुमर्हति ९२ यानिरत्नानिमणि

स०

योगजन्मादीन्निवैप्रभो त्रैलोक्येतुसमस्ता
निसांप्रतंभांतितेग्रेह १३ ऐरावतः समा
नीतोगजरत्नंपुरंदरात् पारिजाततरुश्चा
यंतथैवोच्चैःश्रवाहयः १४ विमानंहंस
संयुक्तमेतत्तिष्ठतितेंगणे रत्नभूतमि
हानीतंयदासीद्वेधसोद्भुतं १५ निधिरेष
महापद्मः समानीतोधनेश्वरात् किंजल्कि
नीददौचाब्धिर्मालामम्लानपंकजां १६

छत्रंते वारणंगेहे कांचनस्रावितिष्टति
तथायंस्यंदनवरो यः पुरासीत्प्रजापतेः
१७ मृत्योरुत्क्रांतिदानाम शक्तिरीश
त्वयाहृता पाशः सलिलराजस्य भ्रातुस्त
वपरिग्रहे १८ निशुंभस्याब्धिजाताश्च
समस्तारत्नजातयः वन्हिरपिददौ
तुभ्यमग्निशौचेच वाससि १९ एवंदैत्यें
द्ररत्नानिसमस्तान्याहृतानिते स्त्रीरत्न

८
६०

मेषाकन्यात्रित्वयाकस्मान्नगृह्यते १००
ऋषिरुवाच १०१ निशम्येतिवचःशुंभःसत
दाचंडमुंडयोः प्रेषयामाससुग्रीवंदूतंदेव्या
महासुरं १०२ इतिचेतिचवक्तव्यासागत्वा
वचनान्मम यथाचाभ्येतिसंप्रीत्यातथा
कार्यंत्वयालघु ३ सतत्रगत्वायत्रास्तेशै
लोद्देशेतिशोभने सादेवीतांततःप्राहश्ल
क्ष्णांमधुरयागिरा ४ दूतउवाच ५ देवि

५९

दैत्येश्वरः शुंभः त्रैलोक्ये परमेश्वरः दूतो
हं प्रेषितस्तेन त्वत्सकाशमिहागतः ६
अव्याहताज्ञः सर्वासु यः सदा देवयोनि
षु निर्जिताखिलदैत्यारिः स यदाह शृणु
ष्व तत् ७ मम त्रैलोक्यमखिलं मम देवा
वशानुगाः यज्ञभागानहं सर्वानुपाश्नामि
पृथक्पृथक् ८ त्रैलोक्ये वररत्नानि म
म वश्यान्यशेषतः तथैव गजरत्नानि हृत्वा

र सं०

दैवैङ्क्वाहनं ९ क्षीरोदमथनोद्भूतमम्बरत्ने
मभामरैः उच्चैः श्रवससंज्ञेन त्वयापित्यस
मर्प्पितं १० यानिचान्यानि देवेषु गंधर्वेषुर
जेषुच रत्नभूतानिभूतानितानिमय्येवशो
भने ११ स्त्रीरत्नभूतांत्वांदेविलोकेमन्यामु
हेवयं सात्वमस्मानुपागछयतोरत्नभुजो
वयं १२ मांवामममानुजेवापिनिशुंभंमुरु
विक्रमं भजत्वंचंचलापांगीरत्नभूतासि

॥ ६८

चेयतः १३ परमैश्वर्यमतुलं प्राप्स्यसे मत्प्र
रिग्रहात् एतद्बुध्वा समालोच्य मत्परिग्रह
तां व्रज १४ ऋषिरुवाच १५ इत्युक्त्वा सा
तदा देवी गंभीरांतस्मिता जगौ दुर्गा भगव
ती भद्रा ययेदं धार्यते जगत् १६ देव्युवाच
१७ सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयो
दितं त्रैलोक्याधिपतिः शुंभो निशुंभश्चा
पि तादृशः १८ किं त्वत्र यत्प्रतिज्ञातं मिथ्या

२ स०

ततांक्रियत्तेकथं श्रूयत्तामल्पबुद्धित्वात्प्र
तिज्ञायाकृत्तापुरा १९ योमांजयतिसंग्रा
मेयोमेदर्प्पंव्यपोहति योमेप्रतिबलोलोके
समेभर्त्ताभविष्यति २० तदागछतुशुंभोत्र
निशुंभोवामहासुरः मांजित्वाकिंचिरेण
त्रपाणिंगृह्णातुमेलघु २१ दूतउवाच २२
अवलिप्तासिमैवंत्वंदेविब्रूहिममाग्रतः
त्रैलोक्येकः पुमांस्तिष्ठेदग्रेशुंभनिशुंभयोः

६

२३ अन्येषामपिदैत्यानांसर्वेदेवानवैयु
धि तिष्ठंतिसन्मुखेदेविकिंपुनः स्त्रीत्वमे
किका २४ इंद्राद्याः सकलादेवास्तस्थुर्ये
षांनसंयुगे शुंभादीनांकथंतेषांस्त्रीप्र
यास्यसिसंमुखं २५ सात्वंगच्छमयैवोक्ता
पार्श्वंशुंभनिशुंभयोः केशाकर्षणनिर्धू
तगौरवामागमिष्यसि २६ देव्युवाच
२७ एवमेतद्बलीशुंभोनिशुंभश्चातिवि

६२ सं०

र्यवान् किंकरोमिप्रतिज्ञांमेयत्कृतालोचि
तापुरा २८ सत्वंगच्छमयैवोक्तंयदेतत्स
र्वमादृतः तदाचक्ष्वासुरेंद्रायसचयुक्तं
करोतुयत् १२९ इतिमार्कंडेयपुराणेसा
वर्णिकेमन्वंतरेदेवीमाहात्म्येदूतवाक्यंना
मपंचमोध्यायः ५ ~~ऋषिरुवाच~~
अथत्रयोगमंत्रअष्टाक्षरी॥८॥ ॐश्रींऐंक्लींसौंह्रीं
श्रींस्वाहा॥

६२

ऋषिरुवाच १ इत्याकर्ण्यवचोदेव्याः सदू
तोमर्षपूरितः समाचष्टेसमागम्यदैत्यरा
जायविस्तरात् २ तस्यदूतस्यतद्वाक्यमा
कर्ण्यासुरराट्ततः सक्रोधः प्राहदैत्याना
मधिपंधूम्रलोचनं ३ हेधूम्रलोचनाशुत्वं
स्वसैन्यपरिवारितः तामानयबलादुष्टां

९६ स०

केनाकर्म्मणोविकृतां ४ तत्परित्राणाहः क
श्चिद्यद्दिवोत्तिष्ठतेपरः सुरेंद्रव्योमगोवापि
यक्षोगंधर्वएववा ५ ऋषिरुवाच ६ तेना
ज्ञप्तस्ततः शीघ्रंसदैत्योधूम्रलोचनः वृतः ष
ष्ट्यासहस्राणाममसुराणांद्रुतंययौ ७ सदृ
ष्ट्वातांततोदेवींतुहिनाचलसंस्थितां जगा
दोच्चैःप्रयाहीतिमूलंशुंभनिशुंभयोः ८ नचे
त्प्रीत्याद्यभवतीमद्भर्तारमुपैष्यति ततोब

९६

लान्नयाम्येषकेशाकर्षणविह्वलां ९
देव्युवाच १० दैत्येश्वरेणप्रहितोबलवा
न्बलसंवृतः बलान्नयसिमामेवंततः
किंतेकरोम्यहं ११ ऋषिरुवाच १२ इत्युक्तः
सोभ्यधावत्तामसुरोधूम्रलोचनः हुंकारेणै
वतंभस्मसाचकाराम्बिकाततः १३ अथ
क्रुद्धंमहासैन्यमसुराणांतथांबिका वव
र्षसायकैःतीक्ष्णैस्तथाशक्तिपरश्वधैः १४

ततोधूतसटः कोपात्कृत्वानादंसुभैरवं प
पात्तासुरसेनायांसिंहोदेव्याः स्ववाहनः १५
कांश्चित्करप्रहारेणदैत्यानास्येनचापरान्
आक्रांत्याचाधरेणान्यान्जघानसुमहासु
रान् १६ केषांचित्पाटयामासनखैःको
ष्ठानिकेसरी तथातलप्रहारेणशिरांसिकृ
तवान्पृथक् १७ विछिन्नबाहुशिरसः
कृतास्तेनतथापरे पपौचरुधिरंकोष्ठाद

न्येषांधुतकेसरः १८ क्षणेनतद्बलंसर्वंक्षयं
नीतंमहात्मना तेनकेसरिणादेव्यावाह
नेनातिकोपिना १९ श्रुत्वातमसुरंदेव्या
निहतंधूम्रलोचनं बलंचक्षयितंकृत्स्नं
देवीकेसरिणाततः २० चुकोपदैत्याधिप
तिःशुंभःप्रस्फुरिताधरः आज्ञापयामा
सचतौचंडमुंडौमहासुरौ २१ हेचंडहेमुं
डबलैर्बहुभिःपरिवारितौ तत्रगच्छतग

त्वान्चसासमानीयतांलघु २२ केशेष्वाकृ
ष्यवध्वा वा यदिवः संशयो युधि तदाशे
षायुधैः सर्वैरसुरैर्विनिहन्यतां २३ तस्यां
हतायां दुष्टायां सिंहे च विनिपातिते शीघ्र
मागम्यतां बध्वा गृहीत्वा तामथांबिकां
२४ इति मार्कंडेयपुराणे सावर्णिके मन्वंत
रे देवीमाहात्म्ये शुंभनिशुंभयोः सेनानी
धूम्रलोचनवधाभिधानः षष्ठोध्यायः ६

अथप्रयोगः॥ दशाक्षरि मंत्रउचार॥१०८॥ॐ
श्री ध्रौं ध्रैं ध्रां ध्रुं ध्रुं धुम्रायैनमः॥

ऋषिरुवाच आज्ञप्तास्ततोदैत्याश्च
उमुंडपुरोगमाः चतुरंगबलोपेतायधुर
भ्युद्यतायुधाः २ ददृशुस्तेततोदेवीमी
षद्धासां व्यव स्थितां सिंहस्योपरिशैलेंद्र
श्रृंगेमहतिकांचने ३ तेदृष्टातांसमादा

नुमुद्यमश्च कुर्युस्ततः ॥ आकृष्टचापा
सिधारास्तथा ॥ येतत्समीपगाः ६ ततः को
पं चकारोच्चैरंबिका तान्नरीन्प्रति कोपे
न चास्या वदने मसीवर्णमभूत्तदा ५ १२
कुटी कुटिलात्तस्याल्ललाटफलकाद्रुतं
कालीकरालवदना विनिःक्रांतासिपा
शिनी ६ विचित्रखट्वांगधरा नरमाला वि
भूषणा द्वीपिचर्मपरीधाना शुष्कमांसाति

भैरवा ७ अतिविस्तारवदनाजिह्वाल
लनभीषणा निमग्नारक्तनयनानादा
पूरितदिग्मुखा ८ सावेगेनाभिपतिता
घातयंतीमहासुरान् सैन्येतत्रसुरारीणा
मभक्षयततद्बलं ९ पार्ष्णिग्राहांकुश
ग्राहीयोधघंटासमन्वितान् समादायै
कहस्तेनमुखेचिक्षेपवारणान् १० त
थैवयोधंतुरगैरथंसारथिनासह निक्षि

पवक्त्रे दशनैश्चर्वयंत्यतिभैरवं ११
एकं जग्राह केशेषु ग्रीवायामथ चापरं पा
देनाक्रम्य चैवान्यमुरसान्यमपोथयत्
१२ तैर्मुक्तानि च शस्त्राणि महास्त्राणि त
थासुरैः मुखेन जग्राह रुषा दशनैर्मथिता
न्यपि १३ बलीनां तद्बलं सर्वमसुराणाम
हात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चा
ताडयत्तथा १४ असिना निहताः के

चित्तकेचित्तखट्वांगताडिताः जग्मुर्वि
नाशमसुरादंताग्राभिहतास्तथा १५ क्ष
णेनतद्बलंसर्वमसुराणांनिपातितं दृष्ट्वा
चंडोभिदुद्रावतांकालीमतिभीषणां १६
शरवर्षैर्महाभीमैर्भीमाक्षीतांमहासुरः
छादयामासचक्रैश्चमुंडक्षिप्तैः सहस्रशः
१७ तानिचक्राण्यनेकानिविशमानानितन्
मुखं बभुर्यथार्कबिंबानिसबहूनिघनो
दरं १८

ततोजहासातिरुषाभीमंभैरवनादिनी का
लीकरालवक्त्रांतर्दुर्दर्शदशनोज्वला १९ उ
त्थायचमहासिंहंदेवीचंडमधावत गृही
त्वाचास्यकेशेषुशिरस्तेनासिनाछिनत् २०
अथमुंडोभ्यधावत्तांदृष्ट्वाचंडंनिपातितं
तमप्यपातयद्भूमौसाखड्गाभिहतंरुषा
२१ हतःशेषंततःसैन्यंदृष्ट्वाचंडंनिपातितं
मुंडंचसुमहावीर्यंदिशोभेजेभयातुरं २२

शिरश्चंडस्यकालीचगृहीत्वामुंडमेवच प्रा
हप्रचंडाट्टहासमिश्रमभ्येत्यचंडिकां २३
मयातवात्रोपहृतौचंडमुंडौमहापशू यु
द्धयज्ञेस्वयंशुंभंनिशुंभंचहनिष्यसि २४
ऋषिरुवाच २५ तावानीतौततोदृष्ट्वा
चंडमुंडौमहासुरौ उवाचकालीकल्या
णीललितंचंडिकावच २६ यस्माच्चं
डंचमुंडंचगृहीत्वात्वमुपागता चामुं

डेति ततो लोके ख्याता देवी भविष्यसि
२७ इति मार्कंडेयपुराणे सावर्णिके म
न्वंतरे देवीमाहात्म्ये चंडमुंडवधो ना
मसप्तमोध्यायः ७ ~~ऋषिरुवाच~~ १ अथ
प्रयोगः॥ मंत्र चतुर्दशाक्षरी॥ ॐ श्रीं क्लीं क्लां क्लैं
क्लौं श्रीं चामुंडायै नमः॥

१०

ऋषिरुवाच १ चंडेच निहते दैत्ये मुं
डेच विनिपातिते बहुलेषुचसैन्येषु
क्षयितेष्वसुरेश्वरः २ ततः कोपपरा
धीनःचेताः शुंभः प्रतापवान् उद्योगं
सर्वसैन्यानां दैत्यानामादिदेश ह ३
अद्य सर्वबलैर्दैत्याः षडशीतिरु
दायुधाः कंबूनां चतुराशीतिर्निर्यां
तु स्वबलैर्वृताः ४ कोटिवीर्याणि पंचा

न्नादसुराणां कुलानि वै शतं कुलानि धौ
म्राणां निर्गछंतु ममाज्ञया ५ कालिका
दौर्हृदा मौर्याः कालिकेयास्तथासुराः
युद्धाय सज्जा निर्यंतु चाज्ञया त्वरिता
मम ६ इत्याज्ञाप्यासुरपतिः शुंभो भैर
वशासनः निर्जगाम महासैन्यसहस्रैर्ब
हुभिर्वृतः ७ आयांतं चंडिकां दृष्ट्वा त
त्सैन्यमतिभीषणं ज्याःस्वनैः पूरया

मासधरणीभागानांतरं ८ ततः सिंहोमहा
नादमतीवत्नपयान्तप घंटास्वेनेनतन्ना
दमं बिकाचोपबंहयत्त ९ धनुर्ज्यासिंह
घंटानांनादापूरितदिग्मुखा निनादेर्भी
षणैः कालीजिग्येविस्तारितानना १० त
न्निनादमुपश्रुत्यदैत्यसैन्यैश्चतुर्दिशं दे
वीसिंहस्तथाकालीसरोषैः परिवारिता
११ एतस्मिन्नंतरेभूपविनाशायसुरद्विषां

भवायामरसिंहानांमत्तिवीर्यबलान्वि
ता १२ ब्रह्मेशगुहविष्नूनांतथैवेंद्रस्य
चशक्तयः शरीरेभ्योविनिःक्रम्यतद्रूपे
श्चंडिकांययुः १३ यस्यदेवस्ययद्रूपंय
थाभूषणवाहनं तद्वदेवहितच्छक्तिर
सुरान्योद्धुमाययौ १४ हंसयुक्तविमा
नाग्रेसाक्षसूत्रकमंडलुः आयाताब्र
ह्मणःशक्तिर्ब्रह्माणीसाभिधीयते १५

माहेस्वरीवृषारूढा त्रिशूलवरधारि
णी महाहिवलयाप्राप्ताचंद्ररेखावि
भूषणा॥ १६ कौमारीशक्तिहस्ताचम
यूरवरवाहना योद्धुमभ्याययौदैत्या
नंबिकागुहरूपिणी॥ १७ तथैववैष्ण
वीशक्तिर्गरुडोपरिसंस्थिता शंखच
क्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ १८
यज्ञवाराहमतुलंरूपंयाविभ्रतोहरेः

